दिनाङ्कः - 03.12.2024 सायम् - 06:20

**मुख्यवार्ताः**

- प्रधानमन्त्री नरेन्द्र मोदी इत्यनेन अद्य चण्डीगढनगरे नूतन-आपराधिकविधीनां सफलकार्यन्वयनं राष्ट्राय समर्पितम्।
- राष्ट्रपति द्रौपदी मुर्मू इत्यनया अद्य नवदिल्लीनगरे ऐषमः अन्ताराष्ट्रियदिव्याङ्गदिवसस्य उपलक्ष्ये राष्ट्रियपुरस्काराः प्रदत्ताः।
- विदेशमन्त्रिणा डॉ. एस जयशंकरेण बोधितं यत्सीमाक्षेत्रेषु शान्तिः भारतचीनयोः उभयोः देशयोः प्राथमिकता अस्ति।
- भारतस्य पवन-कम्पेली बैङ्कॉक-नगरे अस्य वर्षस्य एशिन्-ई स्पोर्ट्स्-गेम्स् इत्येतस्यां प्रतियोगितायां ई-फुटबॉलस्पर्धायां कांस्य पदकं प्राप्तवान्।

**प्रधानमन्त्री नरेन्द्र मोदी**

प्रधानमन्त्री नरेन्द्र मोदी इत्यनेन अद्य चण्डीगढनगरे नूतन-आपराधिकविधीनां सफलकार्यन्वयनं राष्ट्राय समर्पितम्।अस्मिन् अवसरे केन्द्रीयो गृहमन्त्री सहकारितामन्त्री च अमितशाहः अपि उपस्थितः आसीत् । आयोजनं सम्बोधयन् प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् नूतनानां आपराधिकविधीनां कार्यान्वयनम् अस्माकं संविधानेन अस्माकं देशस्य नागरिकानां कृते ये आदर्शाः परिकल्पिताः तेषां पूर्तये दृढपदं वर्तते।

प्रधानमन्त्रिणा उक्तं यत् एते नूतनाः विधयः भारतं औपनिवेशिकविधिविचारेभ्यः मुक्तं करिष्यन्ति। चण्डीगढे नूतनानां आपराधिकविधीनां सफलकार्यन्वयनार्थं पञ्जाब-हरियाणा-उच्चन्यायालयस्य विधिवेतृणां चण्डीगढ-न्यायालय-सदस्यानां च धन्यवादं अभिनन्दनं च दत्तवान्।

अस्मिन् अवसरे केन्द्रीयमन्त्री अमितशाहः अवदत् यत् त्रयः नूतनाः आपराधिकविधयः सम्पूर्णे देशे वर्षत्रयाभ्यन्तरे कार्यान्विताः भविष्यन्ति। श्रीशाहः अवदत् यत् इमे विधयः भारतीयैः निर्मिताः, भारतीयसंसदि, जनेभ्यः न्यायं प्रदातुं च निर्मिताः सन्ति।

ततः पूर्वं मोदीमहोदयः शाहमहोदयः च चण्डीगढनगरे परिवर्तनकारीणां नवीनानाम् आपराधिकविधीनां त्रयाणां भारतीयन्यायसंहिता, भारतीयनागरिकसुरक्षासंहिता, भारतीयसाक्ष्याधिनियमानां च विषये एकां प्रदर्शनीं द्रष्टुम् अपि गतवन्तौ।

## राष्ट्रपति द्रौपदी मुर्मू

राष्ट्रपति द्रौपदी मुर्मू इत्यनया अद्य नवदिल्लीनगरे ऐषमः अन्ताराष्ट्रियदिव्याङ्गदिवसस्य उपलक्ष्ये त्रयस्त्रिंशद्भ्यः अनुकरणीयव्यक्तिभ्यः संस्थाभ्यः च विकलाङ्गजनसशक्तिकरणाय राष्ट्रियपुरस्काराः प्रदत्ताः।

आयोजने सभां सम्बोधयन्ती श्रीमतिः मुर्मूः अवदत् यत् अद्यतनपुरस्कारविजेतारः समाजस्य सम्मुखे आदर्शरूभूताः सन्ति। सा अवदत् यत् तेषां अनुकरणं कृत्वा अन्याः व्यक्तयः संस्थाः च दिव्याङ्गजनानां सशक्तिकरणं प्रति अग्रे आगन्तुं शक्नुवन्ति।

राष्ट्रपतिः अवदत् यत् दिव्याङ्गजनानाम् उद्यमशीलतायाः प्रचारः, तेषां कौशलस्य विकासः च तेभ्यः वृत्त्यवसरान् प्रदातुं, तेषां उत्पादानाम् क्रयणे प्राधान्यं प्रदातुं, विपणनसुविधाः च प्रदातुं साहाय्यं करिष्यति।

तेषां उदाहरणम् अनुसृत्य अन्येऽपि दिव्याङ्गानाम् सशक्तिकरणस्य दिशि अग्रे आगन्तुं शक्नुवन्ति इति सा बोधितवती। अद्यतनपुरस्कारविजेतारः प्रेरणायाः स्रोतोभूताः सन्ति । सममेव सा द्विव्याङ्गानां कृते सार्वत्रिकसुलभतां प्रदातुं सुगम्यभारत-अभियानस्य भूमिकां प्रकाशितवती।

दिव्याङ्गजनानां कृते सर्वथा बाधारहितं वातावरणं प्रदातुं समाजस्य प्राथमिकता भवेत्। सा उल्लेखं कृतवती यत् अस्मिन् वर्षे "समावेशिक-स्थायि-भविष्यतः कृते दिव्याङ्गानाम् नेतृत्वस्य प्रवर्धनम्" इति विषयः अन्ताराष्ट्रिय-दिव्याङ्ग-व्यक्ति-दिवसस्य उत्सवस्य कृते चितो वर्तते ।

अस्मिन् अवसरे सामाजिकन्यायसशक्तिकरणमन्त्री डॉ. वीरेन्द्रकुमारः दिव्याङ्गजनानाम् जीवनं समृद्धं कर्तुं षोडश परिवर्तनकारि- उपक्रमाणाम् अनावरणं कृतवान्।

## जयशङ्करः लोकसभा

विदेशमन्त्रिणा डॉ. एस जयशंकरेण बोधितं यत्सीमाक्षेत्रेषु शान्तिः भारतचीनयोः उभयोः देशयोः प्राथमिकता अस्ति। सः अवदत् यत्, आगामिषु दिनेषु सीमाक्षेत्रेषु सैन्यगतिविधीनां नैयून्यस्य, प्रभावि-प्रबन्धनस्य च द्वयोः विषये चर्चा भविष्यति। विदेशमन्त्री अद्य लोकसभायां चीनदेशेन सह भारतस्य सम्बन्धानां अद्यतनविकासविषये वक्तव्यं ददाति स्म। डॉ. एस जयशंकरः अवदत् यत् विंशत्युत्तरद्विसहस्रतमस्य वर्षस्य एप्रिल-मे-मासयोः पूर्वीलद्दाखे भारतीय-चीन-सेनयोः मध्ये सम्मुख-सङ्घर्षकारणात् तदारभ्य उभयोः देशयोः सम्बन्धाः असामान्यप्रायाः वर्तन्ते। सः सशस्त्रसेनानां भूमिकायाः प्रशंसाम् अकरोत् तदा यत् तस्मिन् काले कोविड्स्थितौ आह्वानेषु सत्स्वपि भारतं द्रुतगत्या प्रभाविरूपेण च प्रतिनियोजनं कर्तुं समर्थम् अभवत्।

## शिवराज-सिंह

केन्द्रीय-कृषि-कृषक-कल्याणमन्त्री शिवराजसिंह-चौहानः उक्तवान् यत् केन्द्र प्रशासनेन विगतेषु-दशवर्षेषु न्यूनतम-समर्थन-मूल्ये प्रायः त्रिगुणात्मिकी वृद्धिः कृतास्ति। अद्य लोकसभायाम् एकस्य प्रश्नस्य प्रत्युत्तरे असौ कथितवान् यत् एनडीए-प्रशासनेन व्यये पञ्चाशत्-प्रतिशतं लाभं संयोजयित्वा एमएसपी इति न्यूनतम-समर्थन-मूल्यं निर्धारितं कृतम्।

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।**

## गडकरी

मार्ग परिवहनराजमार्ग-मंत्री नितिन-गडकरी अद्य जीवाश्मेन्धनस्य विकल्पत्वेन इथेनॉल-मेथनॉल इत्येतयो: सदृशयो: जैवैन्धनस्य उपयोगाय बलं प्रदत्तवान् । नवदिल्ल्याम् ऊर्जासङ्क्रमण-सततमार्ग-परिवहनम् आश्रित्य अष्टादश-सम्मेलनं सम्बोधयन् श्री गडकरी प्रधानमन्त्रिण: नरेन्द्रमोदिन: पञ्च-ट्रिलियन-डॉलरमिताया: अर्थव्यवस्थाया: स्वप्नं पूरयितुं जीवाश्मेन्धनस्य आयातं न्यूनीकर्तुं बलं प्रदत्तवान् । तेनोक्तं यत् भारतं प्राय: द्वाविंशति-लक्षकोटि जीवाश्मेन्धनस्य आयातं करोति अथ अस्या: मात्राया: न्यूनीकरणेन अर्थव्यवस्था सुदृढा भविष्यति।

## संसत्सत्रम्

संसदः उभयोः सदनयोः अद्य कार्यव्यापारः सामान्यतया समारब्धः सर्वकारविपक्षयोः मध्ये प्रचल्यमानः पञ्चदिवसीयः गतिरोधः समाप्तः। लोकसभायां राज्यसभायां च प्रश्नसमये शून्यकाले च जनमहत्त्वस्य विषयाः गृहीताः। लोकसभायां उत्तरप्रदेशस्य सम्भले हिंसाप्रकरणे एकं प्रमुखं व्यापारिकसमूहं विरुध्य कथित-उत्कोच आरोपसन्दर्भे सम्पूर्णविपक्षेण बहिष्कारं कृतम्। सभापतिः ओम बिर्ला तान् शून्यकालावधौ स्वविषयान् उत्थापयितुं पृष्टवान्। काङ्ग्रेस-समाजवादीपार्टी डीएमके इत्यादीनां सदस्यैः कोलाहलपूर्णस्य वातावरणस्य निर्माणं कृतम् । शून्यकालावधौ समाजवादीपक्षस्य सांसदः अखिलेशयादवः सम्भलस्य घटना सुनियोजितः षड्यंत्रः आसीत् इति आरोपं कृतवान् । अस्मिन् विषये सम्बद्धानाम् आरक्षिणां प्रशासनिकाधिकारिणां च विरुद्धं कार्यवाही करणीया इति सः आग्रहं कृतवान्। राज्यसभायां समाजवादीपक्षस्य सांसदः प्रो.रामगोपालयादवः अस्य विषयस्य उत्थापनं कृत्वा अस्मिन् राज्यारक्षिणाम् सहभागिता अस्ति इति आरोपं कृतवान् ।

## इसरो

भारतीयान्तरिक्षानुसन्धान-संघटनं श्वः सायङ्काले अष्टाधिक-चतुर्वादने श्रीहरिकोटाया: सतीशधवन- अन्तरिक्ष केन्द्रात् स्व पी एस एल वी-सी 5 9 प्रक्षेपणयाने प्रोबा-3 इत्येतस्य प्रक्षेपणं

करिष्यति। यूरोपीय-अन्तरिक्ष-संस्थाया: प्रोबा -3 इति उपक्रम: भारतीयान्तरिक्षानुसन्धान-सङ्घटनस्य न्यूस्पेस-इण्डिया-लिमिटेड इत्येतस्या: वाणिज्यिक-शाखाया: सहयोगेन भवति।

<u>ई-स्पोर्ट्स-गेम्स</u>

भारतेन ह्य: थाइलैण्ड्-देशस्य बैङ्कॉक-नगरे अस्य वर्षस्य एशिन्-ईस्पोर्ट्स्-गेम्स् इत्येतस्यां प्रतियोगितायां स्व-प्रथमं-पोडियन-फिनिश इति प्राप्तम् । इदानीं भारतं ई-स्पोर्ट्स्-जगति नेतृत्वं कर्तुं शक्ष्यति यतो हि मिस्टर टॉमबॉय इति नाम्ना प्रख्यति: पवन-कम्पेली बैङ्कॉक-नगरे अस्य वर्षस्य एशिन्-ई स्पोर्ट्स्-गेम्स् इत्येतस्यां प्रतियोगितायां ई-फुटबॉल कांस्य पदकं स्पर्धायां प्राप्तवान्। अस्मिन् आयोजने इदं भारतस्य प्रथमं पदकं वर्तते।

।।इति वार्ता:।।